# संज्ञासूत्रेषु तपरकरणस्य प्रयोजनप्रतिपादनम्

डॉ. पी. आर. अर्चना कारंथ

उपोद्घातः – "तपरस्तत्कालस्य" इति सूत्रेण तपरः तत्कालस्यैव ग्राहको स्यादित्यर्थः निर्दिश्यते । अणुदित् सूत्रेण अण्वर्णैः सकलप्रभेदानामपि ग्रहणसिद्धौ, षण्णामेव प्रभेदानां ग्रहणं यथा स्यादित्येतदर्थमिदं सूत्रम् । अष्टाध्याय्यां तपरघटितानि नैकानि सूत्राणि दरीदृश्यन्ते । क्वचित्स्थलेषु सूत्रोपात्तवर्णानामनण्त्वात् सवर्णग्रहणासिद्धेः षण्णां प्रभेदानां ग्रहणार्थमपि तपरत्वं क्रियते । क्वचिच्च असंदेहार्थम्, मुखसुखार्थं वा तपरत्वं दृश्यते । संज्ञा-परिभाषा-विधि-नियम-अतिदेश-अधिकाराः इति षड्विधसूत्रेषु मध्ये प्रथमोपात्तेषु तपरघटितेषु संज्ञासूत्रेषु तपरत्वस्य प्रयोजनं किमिति सप्रपञ्चमस्मिन् लेखे विमृष्टम् ।

Keywords: संज्ञा, तपरत्वम्, सूत्रप्रकारः, असंदेहार्थम्

पाणिनीयाष्टके सन्ति अष्टाशीतिसंख्याकानि संज्ञासूत्राणि । एभिः संज्ञासूत्रैः भगवता व्याकरणशास्त्रसम्बद्धपारिभाषिकशब्दानां परिचयः अकारि । तत्र च केषुचित् सूत्रेषु तपरकरणं कृतं वर्तते । यथा – "वृद्धिरादैच्", "अदेङ्गुणः", "ईदूदेद्द्विवचनं प्रगृह्यम्" "ओत्", "ईदूतौ च सप्तम्यर्थे" इत्यादिषु । तच्च तपरकरणं "तपरस्तत्कालस्य" इति सूत्रप्रवृत्त्यर्थमिति विदित विषय एव । परं क्वचित् स्थलेषु असंदेहार्थम्, मुखसुखार्थं वा तपरकरणं कृतं वर्तते । एतेषु प्रत्येकस्मिन्नपि सूत्रे तपरकरणस्य प्रयोजनं किमित्यत्र विचार्यते ।

सर्वप्रथमं वृद्धिरादैच्[1] इति संज्ञासूत्रं अष्टाध्याय्यां प्रथमाध्यायस्य प्रथमपादे पाणिनिना सङ्कीर्तितम् । आकार-ऐकार-औकाराणां वृद्धिरिति संज्ञां बोधयति प्रकृतसूत्रम् । सूत्रेऽस्मिन् 'आत्' इति तपरनिर्देशः कृतः । "वृद्धिरादैच्" इति सूत्रे भाष्ये प्रश्नः क्रियते "अथ किमर्थमाकारः तपरः क्रियते"[2] इति । आकारस्य अनण्त्वात् ह्रस्वप्लुतभेदानां ग्रहणं न संभवत्येव "अणुदित्सवर्णस्य चाप्रत्ययः" इति सूत्रेण । एवं स्थिते किमर्थं आकारस्य तपरनिर्देशः आवश्यकः? इति चेत्तत्रैवं समाधीयते

"आकारस्य तपरकरणं सवर्णार्थम्" इति । दीर्घस्याकारस्य ये षड्भेदाः सन्ति तेषां आकारेण ग्रहणं यथा स्यात् इत्येतदर्थं तपरनिर्देशः क्रियते । के ते षड्भेदाः इति चेत् - उदात्तानुदात्तस्वरिताः । किमर्थं तेषां ग्रहणं न भवति ? इति चेत् भेदकाः उदात्तादयः भवन्ति । अतः यादृशस्वरविशिष्टः वर्णः उच्चार्यते तादृश-स्वरविशिष्टैस्यैव ग्रहणं भवति, न तु स्वरान्तरविशिष्टस्यापि । यथा लोके – आचार्येण वेदमन्त्राणां अध्यापनावसरे यदि शिष्येण उदात्ते कर्तव्ये अनुदात्तः पठ्यते, तर्हि सः शिष्यः चपेटया शिक्षितो भवति । उक्तं हि भाष्ये – "य उदात्ते कर्तव्ये अनुदात्तं करोति खण्डिकोपाध्यायः तस्मै चपेटां ददाति, अन्यत् त्वं करोषि"[३] इति । तेन ज्ञायते यत् उदात्तादयः भेदकाः भवन्तीति ।

अथवा भेदकाः गुणाः इति वा स्वीकर्तव्यम् । यतोहि आनुनासिक्यादयः गुणाः अपि आकारस्य भवन्तीति हेतोः गुणशब्दस्य कथनेन सर्वेषामपि धर्माणां संग्रहो जायते । तदुक्तं कात्यायनेन "भेदकत्वात्गुणस्य इति वक्तव्यम्"[४] इति । गुणाः भेदकाः । लोकेऽपि दृश्यते यथा – जलस्य एकत्वेऽपि उष्ण-शैत्यादिगुणान्तरयोगात् "शीतजलं अन्यत्", "उष्णजलं अन्यत्" इत्यादि पृथक् पृथक् व्यवहारः अवलोक्यते । तेन ज्ञायते यत् गुणाः भेदका इति । स्थिते चैवं "वृद्धिरादैच्" इति सूत्रे यदि आकारस्य तपरनिर्देशः न क्रियते, तर्हि एकगुणविशिष्टस्यैव आकारस्य वृद्धिसंज्ञा स्यात्, अन्येषां पञ्च प्रभेदानां सा न स्यात्, अतस्तपरकरणम् ।

परं अभेदकाः गुणाः इति पक्षे तपरकरणस्य व्यर्थता एव स्यात् । यथा लोके देवदत्तः मुण्ड्यपि, जट्यपि, शिख्यपि 'देवदत्त' इति स्वामाख्यां न जहाति इत्यतः गुणानामभेदकत्व - पक्षः एव सिध्यति । एष एव पक्षः न्याय्य इति भाष्यकाराणामाकूतिः । अयं च पक्षः "अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः"[५] इति अनङ्विधायकसूत्रस्थेन उदात्तग्रहणेन ज्ञाप्यते । यदि गुणाः भेदकाः तर्हि, साक्षात् अनङादेशमेव उदात्तस्वरविशिष्टमुच्चारयेत् । तथाकृत्वा उदात्त इति पदाभिधानात् गुणाभेदकत्वमेव सेत्स्यति ।

ननु यदि गुणाः अभेदकाः तर्हि अनुदात्तादेः विधीयमानं कार्यं उदात्तादेः- स्वरितादेः शब्दस्यापि प्राप्नोति । यथा "अनुदात्तादेरञ्"[६] इति विहितः अञ् उदात्तादेः स्वरितादेः शब्दस्यापि प्राप्नोति, यच्च नेष्टम् । एवं अन्तोदात्तात् विहितं

"बह्वचोऽन्तोदात्तात् ठञ्"[७] इति ठञ् प्रत्ययरूपं कार्यम् अनुदात्तान्तस्य, स्वरितान्तस्य शब्दस्यापि प्राप्नोति इति चेदत्रोच्यते – आश्रीयमाणस्य गुणस्य भेदकत्वपक्षस्वीकाराददोषः। यः गुणः शब्देन अभिधीयते, सः गुणः सर्वदा भेदक एव भवति। यथा "शुक्लमालभेत" "कृष्णमालभेत" इत्यादि स्थले, यः शुक्ल – आलब्धव्ये, कृष्णमालभते न हि तेन यथोक्तं कृतं भवति। इत्थञ्च शब्देनोपादीयमानगुणादन्यत्र, गुणाः अभेदका एव इति कृतान्तः। अस्मिंश्च पक्षे उच्चरितेन आकारेण सर्वगुणविशिष्टः आकारः गृहीतः भवतीति तपरनिर्देशः अनावश्यकः।

नन्वेवं तर्हि असंदेहार्थं तपरकरणं स्यात्। असति तकारे "आ ऐच् = ऐच्" इत्युच्यमाने सन्देहः जायते, यत् किमिमौ ऐचौ एव, अथवा आकारोऽपि अत्र अस्ति वा इति। यदि तकारः मध्ये पठ्यते तर्हि आकार-ऐकार-औकाराः इति सुस्पष्टं विज्ञायते। तस्मात् संदेहाभावार्थं तपरकरणम् इति चेन्न –

सर्वविधसंदेहानामपि निवारणार्थमेषा परिभाषा पठ्यते "व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्"[८] इति। अतः तया परिभाषया एव असत्यपि तकारे आकार-ऐकार-औकाराणां वृद्धिसंज्ञा प्रतिपाद्यते। अन्यत्रापि हि एवं जातीयकेषु संदेहेषु अनया परिभाषया एव परिहारः उक्तः। यथा "औतोऽम्शसोः"[९] इत्यत्रापि औतः इति पदे "आ ओतः" इति पदच्छेदं कृत्वा "ओतः अम्शसोः आत्वम्" इति सूत्रार्थो व्याख्यायते। अतः संदेहाभावार्थमपि तपरकरणमनपेक्षितमित्यायातम्।

एवञ्च "वृद्धिरादैच्" इति सूत्रे आकारार्थं तपरकरणस्य अनावश्यकत्वात्, ऐजर्थं तपरकरणम् इत्येष सिद्धान्तः भाष्यकारैर्व्यवस्थापितः। ततश्च द्विमात्रिकयोः ऐकार-औकारयोरेव वृद्धिसंज्ञा यथा स्यात्, त्रिमात्र-चतुर्मात्रिकयोः वृद्धिसंज्ञा मा भूदित्येतदर्थं तपरकरणमिति भाष्ये सिद्धान्तितम्। अन्यथा खट्वा + इन्द्रः = खट्वेन्द्रः, खट्वा + ऐतिकायनः = खट्वैतिकायनः इत्यादौ आन्तर्यतः त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा अभूवन्। एतादृशविप्रतिपत्तिवारणाय तपरकरणं सूत्रे कृतम्। ततश्च ऐच् वर्णौ "तपरस्तत्कालस्य" इति सूत्रेण तत्कालानामेव ग्राहकौ भवतः। तस्मिन् सूत्रे यद्यपि तः परो यस्मात् सः तपरः इति बहुव्रीहिसमासाश्रयणे, ऐजर्थं तपरकरणमित्युपपादयितुं न शक्यते अथापि तात् परस्तपरः इति

पञ्चमीतत्पुरुषसमासाश्रयणे सर्वोऽप्यर्थः सेत्स्यति । इत्थं च "वृद्धिरादैच्" इति संज्ञासुत्रे "गुणाः अभेदकाः" इति पक्षमभ्युपगम्य आकारस्य तपरनिर्देश-अनावश्यकत्वं प्रतिपाद्य, ऐजर्थं तपरकरणमिति सिद्धान्तः शास्त्रे उपस्थापितः ।

ह्रस्वाकार- एकार- ओकाराणां गुणसंज्ञाविधायके "अदेङ्गुणः"[१०] इति शास्त्रेऽपि अदिति तपरकरणं श्रूयते । स च तपरनिर्देशः अकारार्थम्, एङर्थञ्च । त्रयाणामपि वर्णानाम् अण्त्वात्, असति तपरे "अणुदित्सवर्णस्य चाप्रत्ययः"[११] इत्यनेन सर्वेषामपि भेदानां ग्रहणे सिद्धे "तपरस्तत्कालस्य" इत्यनेन षण्णामेव भेदानां संज्ञाविधौ उपस्थितिर्यथा स्यादित्येतदर्थं तपरनिर्देशः भगवता कृतः । तत्र तपरशब्दे बहुव्रीहि-तत्पुरुषसमासयोः[१२] द्वयोरपि स्वीकारात् इष्टार्थसिद्धिः । तेन गङ्गा + उदकम् इत्यादौ स्थानिनोः आकार-उकारयोः त्रिमात्रिकत्वात्, तयोः स्थाने द्विमात्रिकः एकार एव आदेशत्वेन जायते, न तु मात्रासाम्यात् त्रिमात्रिकः एकारः ।

तपरघटितमपरं शास्त्रम् प्रगृह्यसंज्ञाविधायकं "ईदूदेद्विवचनं प्रगृह्यम्"[१३] इति । प्रथमाध्यायस्य प्रथमपादस्थेनानेन सूत्रेण दीर्घ-ईकारान्त, दीघ-ऊकारान्त, दीर्घ-एकारान्तद्विवचनप्रत्ययस्य प्रगृह्यसंज्ञा विधास्यते । हरी एतौ, विष्णू इमौ, पचेते इति इत्यादीनि यथाक्रममुदाहरणानि । संज्ञायाः अस्याः प्रयोजनम् "प्लुतप्रगृह्या अचि नित्यम्"[१४] इति प्रकृतिभावः । प्रकृतसूत्रे ईत् – ऊत् – एत् इति त्रिषु स्थलेषु तपरनिर्देशः दृश्यते । तत्र ईकार-ऊकारयोः माहेश्वरसुत्रे अपाठात्, "अणुदित्..." सूत्रस्य अप्रवृत्तिः, ताभ्यां सर्वसवर्णाग्रहणञ्च स्वतः सिध्यति । एकारस्त्वणिति कृत्वा प्लुतभेदानां अग्रहणार्थं तपरकरणं तदंशे सार्थकम् । ईकारोकारांशे तपरस्य किं प्रयोजनमिति जिज्ञासायामुच्यते – "तपरस्तत्कालस्य" इत्यनेन दीर्घप्रभेदानां उदात्तानुदात्तस्वरितानुनासिकाननुनासिकानां ग्रहणार्थं तयोस्तपरकरणम् इति । अन्यथा ईकार-ऊकाराभ्यां यद्गुणविशिष्टतयोच्चारणं कृतं तद्गुणविशिष्टस्यैकस्यैव प्रगृह्यत्वप्रसङ्गः । इष्यते च सा षण्णामपि, तस्मात् तपरत्वं कृत्वा तेषां संज्ञोपपादनं कर्तव्यम् ।

ननु यद्येवमुक्त्वा दीर्घाणामेव प्रगृह्यत्वं निरूप्यते, तर्ह्यतत्कालत्वात् प्लुतानां ईकारोकारैकाराणां प्रगृह्यत्वं नैव सेत्स्यति यच्चेप्सितमिति चेदत्रोच्यते – प्लुतस्यासिद्धात्वात् तत्कालादेव प्रगृह्यत्वसिद्धिः । अर्थात् अष्टके प्लुतविधायकानां

सर्वेषामपि सूत्राणां त्रिपाद्यां पाठात्, सपादसप्ताध्यायीस्थ-प्रगृह्यसंज्ञासूत्रदृष्ट्या तेषां "पूर्वत्रासिद्धम्"[१५] इत्यसिद्धत्वात्, तत्र स्थले तत्कालत्वात्[१६] सिध्यति प्रगृह्यसंज्ञा । अतो नास्ति दोषः ।

नन्वथापि प्लुतस्थले प्रगृह्यत्वं न भवति, "सिद्धः प्लुतः स्वरसन्धिषु" इति ज्ञापकाश्रयणात् । तथा हि – "प्लुतप्रगृह्या अचि नित्यम्" इति शास्त्रेण प्लुतानां प्रगृह्यसंज्ञकानां वर्णानां, अचि परे नित्यं प्रकृतिभावः विधीयते । विद्यमानस्यैव स्थानिनः कार्ययोगः उचितः[१७] । प्लुतस्तावदसिद्ध इत्यतः तस्य अविद्यमानत्वात् तस्य सपादसप्ताध्यायीस्थेन प्रकृतिभावविधायसूत्रेण कार्यविधानमसम्भवम् । तच्च ज्ञापकं – "प्रकृतिभावे कर्तव्ये प्लुतः सिद्ध" इति । ज्ञापकस्यास्य सामान्यापेक्षत्वात् प्रकृतिभावघटिते कृत्स्नस्वरसन्धिविषये प्लुतस्य सिद्धत्वं समाश्रियते । ज्ञापकस्यास्य सामान्यापेक्षत्वस्वीकारस्य प्रयोजनं तावत् "अतो रोरप्लुतादप्लुते"[१८] इत्युत्वविधायके सूत्रे अप्लुतादप्लुते इति पदद्वयाकरणरूपम् । किञ्च कार्यकालपक्षे[१९] "ईदूदेद्द्विवचनं प्रगृह्यम्" इति संज्ञासूत्रस्य, प्रकृतिभावविधिदेशस्थत्वात् तद्विषयेऽपि प्लुतस्य सिद्धत्वात् तत्कालत्वाभावात् प्रगृह्यत्वाप्रसङ्गः प्लुतस्थले, इति चेन्न –

"सिद्धः स्वरः प्लुतसन्धिषु" इति ज्ञापकस्य सिद्धान्ते अनाश्रयणात्, प्लुतस्य असिद्धत्वात् प्रगृह्यत्वसिद्धिः । ज्ञापितश्चायमंशः "प्लुतप्रगृह्या अचि नित्यम्" इति सूत्रेण, तत्र च "प्लुतभावी प्रकृत्या" इत्येवं व्याख्यान्तरं समाश्रित्य, असिद्धस्यापि प्लुतस्य प्रकृतिभावः क्रियते । किञ्च प्लुतस्य सिद्धत्वं यदि स्वीक्रियते तर्हि क्वचित्स्थलेषु दोषप्रसक्तिरपि जायते यथा - "अणोऽप्रगृह्यस्यानुनासिकः"[२०] इत्यादौ । प्रगृह्यसंज्ञारहितस्य अणः अनुनासिकविधानार्थमिदं सूत्रम् । यथा – बालँ, मधुँ इत्यादयः । परं अग्नी३ इत्यत्र प्लुतस्थले वस्तुतः अनुनासिकः नेष्यते । तत्र स्थले प्लुतस्य असिद्धत्वात्, तत्कालत्वात् "ईदूदेत्" इत्यनेन प्रगृह्यत्वात् अनुनासिकाभावः सिध्यति । यदि प्लुतः सिद्धः तर्हि तस्य अतत्कालत्वात् "ईदूदेत्" इत्यनेन प्रगृह्यत्वाभावे अनुनासिकः दुर्वारः स्यात्, यच्च नेष्टम् । तस्मात् सर्वथा प्लुतस्य असिद्धत्वमेवेष्टव्यम् । ततो प्रगृह्यत्वसिद्धिः ।

नन्वथाप्यत्र संशीतिर्भवति यत् – प्लुतस्य प्रगृह्यत्वसंज्ञया किम् प्रार्थ्यते? यद्युच्येत प्रकृतिभाव इति तदसम्यक्, साक्षात् प्लुतमाश्रित्यैव प्रकृतिभावसिद्धेः । ततो

प्लुतस्य प्रगृह्यत्ववचनमनर्थकमिति चेन्न – "अप्लुतवदुपस्थिते"[२१] इत्यादौ प्लुताश्रप्रकृतिभावनिषिद्धे अपि, प्रगृह्याश्रयस्य प्रकृतिभावस्य विधानार्थं तस्यावश्यकत्वात् । तथा च अवैदिके इति शब्दे प्लुतस्य अप्लुतवद्भावः विधीयते "अप्लुतवदुपस्थिते" इति सूत्रेण । यथा सुश्लोक३ इति इत्यत्र "दूराद्धूते च"[२२] इत्यनेन ककारोत्तरवर्ति- अकारस्य प्लुतत्वे, प्रकृतसूत्रेण अप्लुतवद्भावस्यातिदेशात् प्रकृतिभावाभावे, आद्गुणे सुश्लोकेतीति रूपसिद्धिः । अतिदेशस्य वैकल्पिकत्वात् तदभावे प्लुताश्रितः प्रकृतिभावः – सुश्लोक३ इति । अप्लुत इत्युक्तेऽप्लुत एव विधीयेत, प्लुतश्च निषिध्येत । परम् अप्लुतवदुपस्थितेति सूत्रे वतिनिर्देशात् केवलं प्लुताश्रितः प्रकृतिभाव एव वार्यते, न तु कृतस्य प्लुतस्य निवृत्तिः । ततश्च अग्नी३ इति इत्यपरस्मिन्नुदाहरणे "गुरोऽरनृतोनन्त्यस्याप्येकैकस्य प्राचाम्"[२३] इत्यनेन प्लुते, प्रकृतसूत्रेण अप्लुतवद्भावस्यातिदेशात् प्लुतनिमित्तक - प्रकृतिभावास्याप्रवृत्तौ, सवर्णदीर्घः प्रसज्येत । परं प्लुतस्य असिद्धत्वमादाय ईदूदेदित्यादिना प्रगृह्यत्वे, तदाश्रिते च प्रकृतिभावे कृते, सवर्णदीर्घस्याप्रसक्तौ इष्टस्य अग्नी३ इतीति रूपस्य सिद्धिर्जायते । तस्मात् प्लुतस्य प्रगृह्यसंज्ञावश्यं वक्तव्या। सा च संज्ञा प्लुतस्यासिद्धत्वात् ईदूदेद्द्विवचनमित्यनेनैव सिध्यति । ततश्च सूत्रेऽस्मिन् तपरकरणं सवर्णग्रहणार्थमिति सुस्पष्टम् ।

अस्मिन्नेव प्रगृह्यसंज्ञाप्रकरणे "ओत्"[२४] इत्यपरं तपरघटितं सूत्रं सूत्रयामास भगवान् पाणिनिः । प्लुतस्य व्यावृत्त्यर्थं तत्र तपरकरणम् । तथा च केवलं दीर्घ-ओकारान्तनिपातानामेवानेन प्रगृह्यत्वं कथ्यते । यथा – आहो इति, उताहो इति ।

एवमेव प्रगृह्यत्वबोधके तार्त्तीयीके "ईदूतौ च सप्तम्यर्थे"[२५] इति सूत्रेऽपि तपरत्वं संदृश्यते, तच्च असंदेहार्थं, मुखसुखार्थं वा कृतम् । सप्तम्यर्थे पर्यवसन्नाः ईकारान्त-ऊकारान्तशब्दाः अनेन प्रगृह्यत्वं भजन्ते। वैदिकशब्दप्रयोगविषयकमिदं शास्त्रम्, लौकिके प्रयोगे सप्तम्यां ईकारान्त- ऊकारान्तशब्दयोरलाभात्। प्रकृतसूत्रव्याख्यावसरे "तपरकरणमसन्देहार्थम्" इति स्पष्टं प्राह काशिकाकारः[२६] । गुणान्तरभिन्नानां तुल्यकालानां ग्रहणार्थं तपरकरणमिति वक्तुं तु नैव शक्यते, गुणानामभेकत्वपक्षे सर्वेषां गुणानां ग्रहणसिद्धेः । भिन्नकालानां प्लुतभेदानां निवृत्त्यर्थमपि तपरकरणमनपेक्षितम्, ईकारोकारयोः अनण्त्वादणुदित्सूत्राप्रवृत्तौ

प्लुतभेदानामग्रहणात् । किञ्च सप्तम्यर्थवृत्ति- प्लुतान्ताः ईकारान्तोकारान्तशब्दाः नैवोपलभ्यन्त इति तपरकरणस्य सर्वथा प्रयोजनाभावात्, सन्ध्यभावसम्पादनद्वारा असंदेहार्थं तदिति वक्तव्यम् । यद्यपि सर्वविधसंदेहः "व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम्" इत्यनुसारं व्याख्यानतः एव वार्यते, अथापि मन्दमतीनां स्पष्टप्रतिपत्त्यर्थं तपरत्वमिति समाधेयम् ॥ इति शम् ॥

## पादटिप्पण्यः -

1. पा. सू. 1/1/1
2. महाभाष्यम् 1/1/1
3. महाभाष्यम् १/१/१
4. महाभाष्यम् १/१/१
5. पा. सू. ७/१/७५
6. पा. सू. ४/२/४४
7. पा. सू. ४/३/६७
8. परिभाषेन्दुशेखरः – प. सं. १
9. पा. सू. ६/१/९३
10. पा. सू. १/१/२
11. पा. सू. १/१/६९
12. तः परो यस्मात् सः । तात् परः तपरः ।
13. पा. सू. १/१/११
14. पा. सू. ६/१/१२५
15. पा. सू. ८/२/१
16. दीर्घप्रभेदानामेव सत्त्वात् ।
17. सतो हि कार्यिणः कार्येण भवित्यव्यम् – भाष्यम् १/१/११ । कार्यी – स्थानी ।
18. पा. सू. ६/१/११३
19. कार्येण काल्यते स्वसन्निधिं प्राप्यत इति – कार्यकालपक्षः । संज्ञासूत्राणां-परिभाषासूत्राणां च विधिसूत्रप्रदेशेषु उपस्थितिः, ततः तेषां वाक्यार्थबोधः २०) न तु उपदेशदेशे – इत्यभिप्रायः कार्यकालपक्षस्य ॥
20. पा. सू. ८/४/५७
21. पा. सू. ६/१/१२९

22. पा. सू. ८/२/८४
23. पा. सू. ८/२/८६
24. पा. सू. १/१/१५
25. पा. सू. 1/1/१९
26. काशिका १/१/१९

## सन्दर्भग्रन्थाः –


१) प्रौढमनोरमा-बृहच्छब्दरत्न-लघुशब्दरत्नसहिता प्रथमो भागः

२) लघुशब्देन्दुशेखरः, (पञ्चसन्ध्यन्तो भागः) – 'सुबोधिनी' व्याख्या सहितः, आचार्यः विश्वनाथ मिश्रः

३) व्याकरणमहाभाष्यम्, भाष्यप्रदीपोद्योतसमुल्लसितम्, श्री भार्गव शास्त्री जोषी,

४) शब्दकौस्तुभः (त्रयः भागाः), चौखम्बा संस्कृत प्रतिष्ठान

५) सिद्धान्तकौमुदी बालमनोरमा तत्त्वबोधिनी सहिता, मोतीलाल बनारसीदास पुस्तकालयः

६) सिद्धान्तकौमुदी - लक्ष्मीव्याख्यानम्


❋ ❋ ❋